82/8

अथ लीलावती

भास्कराचार्यप्रणीता

(मूलम्)

82/8

(77)

1243

Leelavaty

अथ "लीलावती" भास्कराचार्यविरचिता

गोचर्मलक्षणं। पुराणेषु॥ दशहस्तेन दंडेन विंशत्पान्चानिवर्त्तनं॥ द

शतान्येवगोचर्मदत्त्वैं इंद्र भते पदं॥१॥

82/8

82/8

लीलावतीमूल मूल ११

82/8

॥श्रीगणेशायनमः॥ ॥ॐनमः॥प्रीतिंभक्तजनस्ययोजनयतेविघ्नंविनिघ्नन्स्मृतस्तंवृन्दारकवृ
न्दवन्दितपदंनत्वामतङ्गाननम् पाटींसद्गणितस्यवच्मिचतुरप्रीतिप्रदांप्रस्फुटांसंक्षिप्ताक्षरको
मलामलपदैर्लालित्यलीलावतीम् १ वराटकानांदशकद्वयंयत्साकाकिणीताश्चपणश्चतस्रः
तेषोडशद्रम्मइहावगम्योद्रम्मैस्तथाषोडशभिश्चनिष्कः २ तुल्यायवाभ्यांकथिताऽत्रगुञ्जावल्ल
स्त्रिगुञ्जोधरणंचतेऽष्टौ गद्याणकस्तद्वयमिन्द्रतुल्यैर्वल्लैस्तथैकोघटकःप्रदिष्टः ३ दशार्द्धगु
ञ्जंप्रवदन्तिमाषंमाषाह्वयैःषोडशभिश्चकर्षं कर्षैश्चतुर्भिश्चपलंतुलाज्ञाःकर्षंसुवर्णस्यसुवर्ण
संज्ञम् ४ यवोदरैरङ्गुलमष्टसंख्यैर्हस्तोऽङ्गुलैःषड्गुणितैश्चतुर्भिः हस्तैश्चतुर्भिर्भवतीहदण्डःक्रो
शःसहस्रद्वितयेनतेषाम् ५ स्याद्योजनंक्रोशचतुष्टयेनतथाकराणांदशकेनवंशः निवर्तनंवि

शतिवंशसंख्यैः हैस्तं चतुर्भिश्च भुजैर्निबद्धम् ६ [illegible] हस्तोन्मितैर्विस्तृतिदैर्घ्यपि
ण्डैर्यद्द्वादशास्रं घनहस्तमानम् धान्यादिके यद्घनहस्तमानं शास्त्रोदिता मागधखारिका सा ७ द्रो
णस्तु खार्याः खलु षोडशांशः स्यादाढको द्रोणचतुर्थभागः प्रस्थश्चतुर्थोंऽस्य तथाढकस्य प्रस्थाङ्घ्रि
राद्यैः कुडवः प्रदिष्टः ८ शेषाः कालादिपरिभाषा लोकप्रसिद्धाः ज्ञेयाः इति परिभाषा लीलाग
ललुलल्लोलकालव्यालविलासिने गणेशाय नमो नीलकमलाऽमलकान्तये १ एकंदशशत
सहस्राऽयुतलक्षप्रयुतकोटयः क्रमशः अर्बुदमब्जं खर्वं निखर्वमहापद्मशंकवस्तस्मात् २ ज
लधिश्चान्त्यं मध्यं परार्द्धमिति दशगुणोत्तरं संज्ञाः संख्यायाः स्थानानां व्यवहाराऽर्थं कृताः पूर्वैः ३
उत्थसंकलितव्यवकलितयोः करणसूत्रं वृत्ताऽर्द्धम् कार्यः क्रमादुत्क्रमतोऽथवाङ्कयोगो यथा
स्थानकमन्तरं वा उदाहरणम् अये बाले लीलावति मतिमति ब्रूहि सहितान्द्विपञ्चद्वात्रिंशत्त्रि

नवतिशताष्टादशदश शतोपेतानेतानयुतवियुतांश्चापि वद मे यदि व्यक्तेयुक्तिवियोगकलनमार्गे
सि कुशला २ न्यासः २ ५ ३२ १९३ १८ १० १०० सयोजनाज्जातं ३६० अयुताच्छोधिते जातं ९६४०
अथ गुणने करणसूत्रं सार्द्धवृत्तद्वयम् गुण्यान्त्यमङ्कं गुणकेन हन्यादुत्सारितेनैवमुपान्त्यमा
दीन् गुण्यस्त्वधोधो गुणखण्डतुल्यस्तैः खण्डकैः सङ्गुणितो युतो वा १ भक्तो गुणः शुध्यति ये
न तेन लब्ध्या च गुण्यो गुणितः फलं वा द्विधा भवेद्रूपविभाग एवं स्थानैः पृथग्वा गुणितः समेतः २
इष्टोनयुक्तेन गुणेन निघ्नोऽभीष्टघ्नगुण्यान्वितवर्जितो वा अत्रोद्देशकः बाले बालकुरङ्गलो
लनयने लीलावति प्रोच्यतां पञ्चत्र्येकमिता दिवाकरगुणा अङ्काः कति स्युर्यदि रूपस्थानवि
भागखण्डगुणने कल्यासि कल्याणि निच्छिन्नास्तेन गुणेन ते च गुणिता जाताः कति स्युर्वद १
न्यासः गुण्यः १३५ गुणकः १२ गुण्यान्त्यमङ्कं गुणकेन हन्यादिति कृते जातं १६२० अथवा गुण

कस्य रूपविभागे खंडे कृते ७ ५ आभ्यां पृथग्गुण्ये गुणिते युते च जातं तदेव १६२० अथवा गुणक
स्त्रिभिर्भक्तो लब्धं ४ एभिस्त्रिभिश्च गुण्ये गुणिते जातं तदेव १६२० अथवा स्थानविभागे कृते खंडे
१ २ आभ्यां पृथग्गुण्ये गुणिते यथास्थानयुते च जातं तदेव १६२० अथवा द्व्यूनेन गुणेन १० गुण्ये
गुणिते १३५० द्वाभ्यां च २ पृथग्गुण्ये गुणिते २७० युते च जातं तदेव १६२० अथवाऽष्टयुतेन गुणे
न २० गुण्ये गुणितेऽष्टगुणगुण्येन हीने च जातं तदेव १६२० इति गुणाकारः अथ भागहारे कर
णसूत्रं वृत्तम् भाज्याद्धरः शुध्यति यद्गुणः स्यादन्त्यात्फलं तत्खलु भागहारे समेन केनाऽप्य
पवर्त्य हारभाज्यौ भजेद्वा सति संभवे तु १ अत्र पूर्वोक्तोदाहरणे गुणितानामंकानां स्वगुणच्छे
दानां न्यासः भाज्यः १६२० भाजकः १२ भजनाल्लब्धो गुण्यः १३५ अथवा भाज्यहारौ त्रिभिरप व
र्तितौ ५४० ४ चतुर्भिर्वा ४०५ ३ स्वस्वहारेणाहृते फलं तदेव १३५ इति भागहारः अथ वर्गकरण
सूत्रं वृत्तद्वयम् समद्विघातः कृतिरुच्यतेऽथ स्थाप्योऽन्त्यवर्गो द्विगुणान्त्यनिघ्नाः स्वस्वोपरिष्टाच्च त

थापरेङ्कास्त्यक्त्वान्त्यमुत्सार्यपुनश्चराशिम १ खण्डद्वयस्याभिहतिर्द्विनिघ्नीतत्खण्डवर्गैक्ययुताकृ
तिर्वा इष्टोनयुग्राशिवधःकृतिःस्यादिष्टस्यवर्गेणसमन्वितोवा २ अत्रोद्देशकः सखेनवानांचच
तुर्दशानांब्रूहित्रिहीनस्यशतत्रयस्य पञ्चोत्तरस्याप्ययुतस्यवर्गंजानासिचेद्वर्गविधानमार्गं १
न्यासः ९ १४ २९७ १०००५ एषांयथोक्तकरणेनजातावर्गाः ८१ १९६ ८८२०९ १००१०००२५
अथवानवानांखण्डे ४ ५ अनयोराहति २० र्द्विघ्नी ४० तत्खण्डवर्गै १६ २५ क्य ४१ युताजाता
सैवकृतिः ८१ अथवाचतुर्दशानांखण्डे ६ ८ अनयोराहति ४८ र्द्विघ्नी ९६ तत्खण्डवर्गै ३६ ६४
क्येण १०० युताजातासैवकृतिः १९६ अथवाखण्डे ४ १० तथापिसैवकृतिः १९६ अथवारा
शिः २९७ अयंत्रिभिरूनः २९४ पृथग्युतश्च ३०० अनयोर्घातः ८८२०० त्रिवर्गेण ९ युतःसैवकृ
तिः ८८२०९ एवंसर्वत्रापिवर्गः अथवर्गमूलेकरणसूत्रंवृत्तम् त्यक्त्वान्त्याद्विषमात्कृतिंद्विगु
णयेन्मूलंसमेतद्धृतेत्यक्त्वालब्धकृतिंतदादिविषमाल्लब्धंद्विनिघ्नंन्यसेत पङ्क्त्यांपङ्क्तिहृतेसमे ३

न्यविषमात्त्यक्त्वाप्तवर्गं फलं पङ्क्त्यां तद्द्विगुणं न्यसेदिति मुहुः पङ्क्तेर्दलं स्यात्पदम् १ अत्रोद्देशकः मूलं च
तुर्णां च तथा नवानां पूर्वं कृतानां च सखे कृतीनाम् पृथक्पृथग्वर्गपदानि विद्धि बुद्धेर्विवृद्धिर्यदि तेऽत्र जा
ता १ न्यासः ४ ९ ८१ १९६ ८८२०९ १००१०००२५ लब्धानि यथाक्रमेण मूलानि २ ३ ९ १४ २९७
१०००५ इति वर्गमूलम् अथ घने करणसूत्रं वृत्तत्रयम् समत्रिघातश्च घनः प्रदिष्टः स्थाप्यो घनो
न्त्यस्य ततोऽन्त्यवर्गः आदित्रिनिघ्नस्तत आदिवर्गस्त्र्यन्त्याहतोऽथादिघनश्च सर्वे १ स्थानान्तरत्वे
न युता घनः स्यात्प्रकल्प्य तत्खण्डयुगं ततोऽन्त्यम् एवं मुहुर्वर्गघनप्रसिद्धावाद्याङ्कतो वा विधि
रेष कार्यः २ खण्डाभ्यां वा हतो राशिस्त्रिघ्नः खण्डघनैक्ययुक् वर्गमूलघनः स्वघ्नो वर्गराशेर्घ
नो भवेत् ३ अत्रोद्देशकः नवघनं त्रिघनस्य घनं तथा कथय पञ्चघनस्य घनं च मे घनपदं च त
तोऽपि घनात्सखे यदि घनेऽस्ति घना भवतो मतिः १ न्यासः ९ ३ १२५ जाताः क्रमेण घनाः

यथापञ्चविं
शत्यधिकश
तस्याद्यौङ्क
तोवाविधिरि
तिकरणेन
जातोन्यासः
१५६२५
१८७५
७५
१
एषां योगः
१९५३१२५

७२९ १९६८३ १९५३१२५ अथवा नवानां खण्डे ४ ५ आभ्यां राशि ९ हतः ८० त्रिघ्नश्च ५४० खण्ड
घने ६४ १२५ क्येन १८९ युतो जातो घनः ७२९ अथवा राशिः २७ अस्य खण्डे २० ७ आभ्यां राशि
हतः ३७८० त्रिघ्नश्च ११३४० खण्डघनैः ८००० ३४३ क्येन ८३४३ युतो जातो घनः १९६८३ अ
थवा राशिः ४ एतन्मूलस्य २ घनः ८ अस्य वर्गो जातश्चतुर्णां घनः ६४ अथवा राशिः ९ अ
स्य मूलं ३ अस्य घनः २७ अस्य वर्गो जातो नवानां घनः ७२९ य एव घनवर्गः स एव वर्गघ
नः स्यादित्यादि इति घनः अथ घनमूले करणसूत्रं वृत्तद्वयम् आद्यं घनस्थानमथाघने द्वे
पुनस्तथान्त्याद्घनतो विशोध्य घनं पृथक्स्थं पदमस्य कृत्या त्रिघ्न्या तदाद्यं विभजेत्फलं तु ।
पङ्क्त्यां न्यसेत्तत्कृतिमन्त्यनिघ्नीं त्रिघ्नीं त्यजेत्तत्प्रथमात्फलस्य घनं तदाद्याद्घनमूलमेवं प
ङ्क्तिर्भवेदेवमतः पुनश्च २ अत्रोदाहरणार्थं पूर्वघनानां न्यासः ७२९ १९६८३ १९५३१२५ ४

लब्धानि क्रमेण मूलानि ९ ८ ७ । १२५ इति घनमूलं इति परिकर्माष्टकं अथांशसवर्णनं तत्र भागजातौ करणसूत्रं वृत्तं
अन्योन्यहाराभिहतौ हरांशौ राश्योः समच्छेदविधानमेवं मिथो हराभ्यामपवर्त्तिताभ्यां यद्वा हरांशौ सुधियात्र गुण्यौ
२८ अत्रोद्देशकः रूपत्रयं पंचलवस्त्रिभागो योगार्थमेतान्वद तुल्यहारान् त्रिषष्टिभागश्चतुर्दशांशः समच्छिदो
मित्र वियोजनार्थं ३० न्यासः [box] जाताः समच्छेदाः ४५ २५ योगे जातं न्यासः समाध्येव १४ १५ १५ र्त्तितहरा
९ २ भ्यां ९ २ संगुणितौ समं[box]च्छेदौ वियोजिते जातं ७ इति भाग ११ जातिः प्रभागजा १२६ तौ करणसू
त्रं वृत्तार्द्धं १२६ १२६ लवा लवघ्नाश्च हरा हराघ्ना भागप्रभागेषु सवर्णनं स्यात् ११४ अत्रोद्देशकः द्रम्मार्द्धत्रिलवद्व
यस्य सुमते पादत्रयं यद्भवेत् तस्यांशकशोडशांशचरणः संप्रार्थितेनार्थिने दत्तो येन वराटकाः कति कदर्येण
र्पितास्तेन मे ब्रूहि त्वं यदि वेत्सि वत्स गणिते जातेः प्रभागाविधा २९ न्यासः १ १ २ ३ १ १ १ सवर्णिते जातं १
१ २ ३ ४ ५ १६ ४

कृतीधनविधौतुधनोविधेयोहारांशयोरप्यपदेचपरप्रसिद्धो उदाहरणं सार्धत्रयाणांकथयाशुवर्गंवर्गात्ततोवर्गपदंच
मित्रधनंचमूलंचधनात्ततोपिजानासिचेद्वर्गघनौविभिन्नौ न्यासः ७/२ अस्यजातोवर्गः ४९/४ अतोलब्धंमूलं ७/२
अस्यघनः ३४३/८ अतोघनंमूलं ७/२ इतिभिन्नपरिकर्माष्टकं अथशून्यपरिकर्मसुकरणसूत्रंमार्याद्वयं योगे
खंक्षेपसमंवर्गादौखंखभाजितोराशिः खहरस्यात्खगुणः खंखगुणश्चिंत्यश्चशेषविधौ शून्येगुणकेजाते
खंहारश्चेत्पुनस्तथाराशिः अविकृतएवज्ञेयस्तथैवखेनोनितश्चयुतः उदाहरणं खंपंचयुक्भवतिकिंव
दखस्यवर्गंमूलंघनंघनपदंखगुणाश्चपंच खेनोद्धृतादशचकःखगुणोनिजार्धयुक्तस्त्रिभिश्चगुणितःखह
तस्त्रिषष्टिः न्यासः १० एतत्खभक्ताः १० अथाज्ञातोराशिः तस्यगुणः सार्धस्तेयः ३/२ गुणः २ हारः ० दृश्यं ६३ अ
तोवक्ष्यमाणविलोमविधिनाइष्टकर्मणावालब्धोराशिः १४ अस्यग्रहगणितेमहानुपयोगः इतिशून्यपरि

ली०
५

एकोद तोपराटकः १ इतिप्रभागजातिः भागानुबंधभागो यथाहमोः कर्णसूत्रंसार्धवृत्तं छेदघ्नरूपेषुलवार्धेन।
तोमेकस्यभागाअधिकोनकाश्च स्वांशाधिकोनःखलुयः तत्रत्रभागानुबंधेत्रलवायुवाबेहे २२ तलस्याहारेण
हरंनिहन्यात्स्वांशाधिकोनेनतुतेनभागान् अत्रोदेशकः सांघ्रिद्वयंत्र्यंव्युप्रकीरकुद्रहिसवर्णितं जाना।
स्यांशानुबंधंचेतथाभागापवाहनं न्यासः २ १ ~~घ्रिःस्वत्र्यंशयुक्तः~~ सावर्णितेजातंअपिचको अाः अं घ्रिः
स्वत्र्यंशयुक्तः ९ ११ सनिजदलयुतः कीदृशोऽ ४ ४ वेत्र्यंशोस्वाष्टांशहीनोतस्तुचरहितोतोत्रिभिःसप्तभागैः अर्धं
स्वाष्टांशहीनंनवभिश्वरथयुतंशप्तमांशे स्वकीयैः कीदृक्स्याद्ब्रूहिवोत्सेत्वमिह यदसस्वेसानुबंधापवाहो न्यासः
१ २ १ सवर्णितेजासंक्रमेण इतिभागजातचतुष्टयं भिन्नसंकलितव्यकलितयोःकर्णसूत्रंप्रवक्तराई ५
४ ३ २ १ १ १ योगो तरंतुल्यहरांशकानांकल्पोहरंरूपमहाररारा अत्रोदेशकः पंचांकशपादत्रिलवा
१ १ १ २ ३ १
३ ८ ८
१ ३ ९
२ ७ ७

लब्धानि क्रमेण मूलानि (८४७)१२५ इति घनमूलं इति परिकर्माष्टकं अथांश सवर्णनं तत्र भागजातौ करणसूत्रं वृत्तं
अन्योन्यहाराभिहतौ हरांशौ राश्योः समछेदविधानमेव मिथो हराभ्यामपवर्त्तिताभ्यां यद्वा हरांशौ सुधियात्र गुण्यौ
२८ अत्रोद्देशकः रूपत्रयं पंचलवस्त्रिभागो योगार्थमेतान्वद तुल्यहारान् त्रिषष्टिभागश्चतुर्दशांशः समछिदौ
मित्र वियोजनार्थं ३० न्यासः [illegible] जाताः समछेदाः ४५ ३५ योगे जातं न्यासः एवं १५ १५ १५ जितहरा
६२ न्यां ६२ संगुणितौ समछेदौ वियोजिते जातं ७ इतिभाग ११ जातिः प्रभागजा १२६ तौ करणसू
त्रं वृत्तार्द्धं १२६ १२६ लवालवघ्नाश्च हराहरघ्ना भागप्रभागेषु सवर्णनं स्यात् १ १ १४ अत्रोद्देशकः द्रम्मार्द्धत्रिलवद्व
यस्य सुमतो पादत्रयं यत्पदं वेतसं चांशकषोडशांशचरणः संप्रार्थितेनार्थिने दत्तो येन वराटकाः कति कदर्येण
र्पितास्तेन मेब्रूहि त्वं यदि वेत्सि वत्स गणिजातेजातंप्रभागाविधा ३१ न्यासः १ १ २ ३ १ १ १ सवर्णिते जातं १
१ २ ३ ४ ५ १६ ४

कर्मणि अथव्यस्तविधौसूत्रंश्लोकौ छेदंगुणंगुणंछेदंवर्गंमूलंपदंकृतिं ऋणंस्वंस्वमृणंकुर्यात्दृश्येराशिप्रसिद्धये
अथस्वांशाधिकोनेतुलवाढ्योनोहरोहर: अंशस्त्वविकृतस्तत्र विलोमेशेषमुक्तवत् उदाहरणं यस्त्रिघ्नस्त्रिभि
रन्वितस्वचरणैर्भक्तस्तत:सप्तभि:स्वत्र्यंशेनविवर्जितस्वगुणितोहीनोद्विपंचाशता तन्मूलेऽष्टयुतेहृतेचदश
भिजातंद्वयंब्रूहितंराशींवेत्सिहिचंचलाक्षिविमलांबालेविलोमक्रियां ४ गुण ३ युक्ते ३/४ भाग ७ स्व० स्व ६ हो
नं ५२ मूलं १२ अष्टयु २ तंभागं १० दृश्य २ यथोक्तकरणसूत्रंवृत्तं उद्देशकालापवदिष्टराशिक्षुण्णोहृतो
शैरहितोयुतोवा इष्टाहतंदृष्टमनेनभक्तंराशिर्भवेत्प्रोक्तमितीष्टकर्मा ४९ उदाहरणं पंचघ्नस्वत्रिभागोनोदशभ
क्त:समन्वित: राशित्र्यंशार्धपादै:स्यात्कोराशिर्द्व्यूनसप्तति: ५० गुण: ५ स्व १/३ भाग १० राशिभागे १/३ १/२ १/४
समन्वितोदृश्य: ६८ इष्टंकल्पितं ३ इदंपंचगुणितंसत्र्यंशेन १० अनेनोनं २० दृश्य २ भक्तं २

ली० इष्टेराशित्र्यंशेन २ अनेनहीनमुक्तं जाताः इष्टार्धेनानेन २ युक्तं ७ इष्टचतुर्थांशेन ६ अनेनयुक्तं ९ इष्टनानेन ६ इष्टं
७ गुणितंजातं ४०८ अनेनभक्तं ९ लब्धं ४८ एवमेकादिनेष्टेनापिफलंतेनेदेव अथपरस्यजातिः अमलकमलराशे
स्त्र्यंशपंचांशषष्ठैस्त्रिनयनहरिसूर्यायेनतुर्येणचार्याः गुरुपदमथषड्भिः पूजितंशेषपद्मैः सकलकमलसं
ख्यांक्षिप्रमाख्याहितस्य ५० न्यासः १/३ १/५ १/६ १/४ दृश्य ६ कल्पितमिष्टं २ इष्टत्र्यंशेनानेन १ इष्टपंचांशेन २ षष्ठां
शेन ३ चतुर्थांशेन ३ इष्टमूलेजातं ६ इष्टेनहृतं २ दृश्यं ५ जातं १८ अनेनदृश्याहतंदृश्यंभक्तंजातापद्म
संख्या १२० एवमेकादिनाइष्टेनापि अथशेषजातौकरणसूत्रंवृत्तार्धं छिन्नघातभक्तेनलवोनहारघातेनभाज्यःप्रक्
टाख्यराशिः शेषजात्युदाहरणं सार्धमिशात्पयागेनवलवयुगलंयोऽवशेषाच्चकाश्यां शेषांघ्रिःशुल्कहेतोः पथिदि ७
श्यमलवान्षड्शेषाऽयायां शेषाजिह्मत्रिषष्टिर्निजगृहमनयातीर्थपांथःप्रयात तस्यद्रव्यप्रमाणंवदय

दिभवताशेषयातिःश्रुतास्तिः ५१ न्यासः दृश्य ६२ कल्पितमिमंरूपं १ स्वार्द्धं १/२ शेषनवांशकद्वयेन २/९ शेषःचतुर्थांशेन १/४ शे
षदशांशषट्केन ६/१० १९ १ इष्टेनहृतंदृश्यं ६२ अनेनभक्तं ७/६० भक्ताजातानिष्कसंख्या ५४० एवंविलोमविधिनापिसिध्यति ए
वमेकादिनेष्टेनापि अथवाभागापभागविधिनापिसिद्धि अथविश्लेषजात्युदाहरणं पंचांशोलिकुलात्कदंबमगमत्
त्र्यंशः शिलींध्रं तयोर्विश्लेषस्त्रिगुणोमृगाक्षिकुटजं दोलायमानोपरः कांतेकेतकमालतीपरिमलप्राप्तैककालप्रि
याहूताहूतइतस्ततोभ्रमतिखेभृंगोलिसंख्यावद ५२ न्यासः १/५ १/३ ३ अनयोराश्योर्योगांतरंतुल्यहरांशकानामितिह
तेलब्धाविश्लेषांतरं २/१५ अयंत्रिगुणः ३ दृश्य १ कल्पितमिष्टं ३० १४ पंचांशेन ६ १४ हृतेदृश्ये ३० अनेनभक्तेजाता
अलिसंख्या १५ एवमन्यत्रापि इष्टकर्मसंक्रमणेकर्णस्त्रेवतांर्द्धयोर्योगांतरेणोनयुतोर्द्धितस्तौराशिस्मृतंसंक्रमणाख्य
मेतत् ५३ उदाहरणं ययोर्योगःशतंशेकं स्वयोगःपंचविंशतिः तौराशीवदमेवत्सवेत्सिसंक्रमणंयदि ५४ न्यासः

ली० ८ शेषः १०१ अंतरं २५ जातौ राशी ३८ ६३ वर्गसंक्रमणोक्तौ सूत्रं वर्गांतरं राशिवियोगभक्तं योगस्ततः प्रोक्तवदेव राशी उदाहरण राश्योर्य
योर्वियोगोऽष्टौ तत्कृत्योश्च चतुःशती विवरं ब्रूहि तौ राशी शीघ्रं गणितकोविद ५५ न्यासः राश्यंतरं ८ कृत्यंतरं ४०० जातौ रा
शी २१ २९ इति विषमवर्गसमाप्तं अथ किंचिद्वर्गकर्म प्रोच्यते इष्टकृतिरष्टगुणिता व्येका दलिता विभाजितेष्टेन एकस्याद
स्य कृतिर्दलिता सैका परो राशिः ५६ रूपं द्विगुणेष्टहृतं सेष्टं प्रथमोऽथवापरो रूपं कृतियुतिवियुती व्येके वर्गौ स्यातां तयोः
राश्योः ५७ उद्देशकः राश्योर्ययोः कृतिवियोगयुती निरेके मूलप्रदे प्रवद तौ मम मित्र यत्र क्लिश्यंति बीजगणिते पटवोऽपि
मूढाः षोढोक्तगूढगणितं परिभावयंतः ५८ अथ प्रथमानये कल्पितमिष्टं १/२ अस्य कृतिः १/४ अष्टगुणिता २
व्येका १ दलिता १/२ इष्टेन हृता जातः प्रथमो राशिः १ अस्य कृतिः १ दलिता १/२ सैका ३/२ अयमपरो राशिः ३/२ एवमेतौ
राशी १ ३/२ एवमेकेनेष्टेन जातौ राशी [illegible] ५९ द्विकेन [illegible] अथ द्वितीयप्रकारेष्ट १ अनेन द्विगुणेन २ रूपम
के १ एतदिष्टसहितं जातम् ३/२ जातः प्रथमो राशिः द्वितीयो रूपमेव एतौ राशी ३/२ १ एवं द्विकेनेष्टेन जातं राशी ५/४ १ त्रि ८

वासूत्रम्. इष्टस्यवर्गवर्गोघनश्चतावष्टसंगुणौप्रथमः सैकोराशीस्यातामेवंव्यक्तेऽथवाऽव्यक्ते
अत्रेष्टम् १/२ अस्यवर्गवर्गः १/१६ अयमष्टगुणः १/२ सैकोजातंप्रथमोराशिः ३/२ पुनरिष्टं १/२ अस्यघनः १/८
अष्टगुणोजातोद्वितीयोराशिः १ एवंजातौराशी ३/२ १ एवमेकेनेष्टेन ९ ८ द्विकेन १२९ ६४
त्रिकेण ६४९ २१६ एवमिष्टवशादानन्त्यम् पाटीसूत्रोपमंवीजंगूढमित्यवभासते नाऽ
स्तिगूढममूढानांनैवषोढेत्यनेकधा १ इतिवर्गकर्म इहमूलांशजातौसूत्रम् गुणघ्नमूलो
नयुतस्यराशेर्दृष्टस्ययुक्तस्यगुणार्द्धकृत्या मूलंगुणार्द्धेनयुतंविहीनंवर्गीकृतंप्रष्टुरभी
ष्टराशिः १ यदालवैश्चोनयुतस्सराशिरेकेनभागोनयुतेनभक्त्वा दृश्यंतथामूलगुणंच
ताभ्यांसाध्यस्ततःप्रोक्तवदेवराशिः २ योराशिःस्वमूलेनकेनचिद्गुणितेनोनोयुतोवादृश्य
तेनस्यमूलगुणार्द्धकृत्यायुक्तस्यवर्गोराशिःस्यात् मूलोनेदृष्टेतावदुदाहरणम् बालेमरा

यत्पदंतद्गुणार्द्धेनयुतंकार्यंयदिमूलोनोदृष्टोराशिः यदिगुण
घ्नमूलयुतोदृष्टस्तर्हिविहीनंकार्यंतस्य १४ त्रुटिःसर्वाधःपङ्क्तेर्धि

ली
१०

लकुलमूलदलानि सप्ततीरे विलासभरमन्थरगान्यपश्यम् कुर्वच्च केलिकलहं कलहंसयुग्मं
शेषं जले वद मरालकुलप्रमाणम् १ न्यासः मूलगुणं ७ दृश्यं २ दृष्टस्याऽस्य २ गुणाऽर्द्धं ७ कृ
त्या ४२ युक्तस्य ८१ मूलं ९ गुणाऽर्द्धेन ७ युतं १६ ४ स्व २ हरेणाभक्तं ४ वर्गीकृतं सञ्जातो ४ रा
शिः १६ १६ मूल १६ युते ४ दृष्टेनावद्दु ४ दा १६ हरणम् स्वपदैर्नवभिर्युक्तं स्याच्चत्वारिंश
ताऽधिकम् शतं द्वादशकं विद्वन्कः स राशिर्निगद्यताम् १ मूलगुणां ९ दृश्यं १२४० यथोक्त
करणेन जातो राशिः ९६१ अथ मूलभागाभ्यां मूने दृष्टे उदाहरणम् यातं हंसकुलस्य मूल
दशकं मेघागमे मानसं प्रोड्डीय स्थलपद्मिनीवनमगादष्टांशकोम्भस्तलात बाले बालमृणा
लशालिनि जले केलिक्रियालालसं दृष्टं हंसयुगत्रयं च सकलां यूथस्य सङ्ख्यां वद १ न्यासः
मूलगुणं १० भागः १/८ दृश्यम् ६ यदा लवेश्योनयुत इत्यत्र भागोनेनैकेन ७/८ मूलगुणं दृश्यं च

ली
१०

भक्तं जातं ८० ४८ आभ्यां गुणघ्नमूलोनयुतस्येत्यादिना जातं हंसकुलमानं १४४ अथान्यदु
दाहरणं ७ ७ म् पार्थः कर्णवधाय मार्गणगणं क्रुद्धो रणे सन्दधे तस्यार्द्धेन निवार्य तच्छ
र गणान्मूलैश्चतुर्भिर्हयान् शल्यं षड्भिरथेषुभिस्त्रिभिरपि छत्रं ध्वजं कार्मुकं चिच्छेदाऽस्य
शिरः शरेण कति ते यानर्जुनः सन्दधे १ अत्र यथोक्तकरणेन जातं बाणमानम् १०० अपि
च अलिकुलदलमूलं मालतीं यातमष्टौ निखिलनवमभागाश्चाऽलिनी भृङ्गमेकम् नि
शि परिमललुब्धं पद्ममध्ये निरुद्धं प्रतिरणति रणन्तं ब्रूहि कान्तेऽलिसङ्ख्याम् १ अत्र क्लि
राशिनवांशाऽष्टकं राश्यर्द्धमूलं च राशेः स्थाने रूपद्वयं दृश्यम् २ [illegible] दृश्यं चाऽर्द्धितं रा
श्यर्द्धस्य भवतीति न्यासः भागाः ८/९ मूलगुणम् १/२ दृश्यं १ राश्यर्द्धस्यांशो राश्यंशार्द्धः स्या
दिति भागाः ८/९ अत्र प्राग्वल्लब्धं रा २ शिदलं ३६ २ द्विगुणितमलिकुलमानम् ७२ उदाह

अंशास्त्वविकृता एव यतो राशेर्नवांशाष्टकस्यार्द्धं
राश्यर्द्धनवांशाष्टकं च सममेव स्यादिति २ —

रणाम् योराशिरष्टादशभिः स्वमूलैराशित्रिभागेनसमन्वितश्च जातंशतंद्वादशकंतमाशु
जानीहिपाटीपटुताऽस्तिचेत् १ न्यासः भागः ३ मूलगुणं १८ दृश्यं १२०० अत्रैकेनभागयु
तेन ४ मूलगुणंदृश्यंचभक्त्वाप्राग्वज्ज्ञातोरा ३ शिः ५७६ अथत्रैराशिकेकरणसूत्रंवृत्तं
प्रमाणमिच्छाचसमानजातीआद्यन्तयोस्तत्फलमन्यजाति मध्येतदिच्छाहतमाद्य
हृत्स्यादिच्छाफलंव्यस्तविधिर्विलोमे १ अत्रोदाहरणम् कुङ्कुमस्यसदलंपलद्वयंनिष्क
सप्तमलवैस्त्रिभिर्यदि प्राप्यतेसपदिमेवणिग्वरब्रूहिनिष्कनवकेनतत्कियत् न्यासः
३ ५ ९ लब्धानिकुङ्कुमपलानि ५२ कर्षौ २ अपिच प्रकृष्टकर्पूरपलत्रिषष्ट्याचेल्लभ्यते
७ २ १ निष्कचतुष्कयुक्तम् शतंतदाद्वादशभिःसपादैःपलैःसमाचक्ष्वसखेविचिन्त्य १
न्यासः ६३ १०४ ४९ लब्धानिष्काः २० द्रम्माः ३ पणाः ८ काकिण्यः ३ वराटकाः ११ वराटकमा ११
४

गाथ्य १ उद्देशकः द्रम्मद्वयेन साऽर्द्धांशशालितन्दुलखारिका लभ्या चेत्पणसप्तत्यात्तत्
किं सपदि कथ्यताम् १ अत्र प्रमाणस्य सजातीयत्वकरणार्थं द्रम्मद्वयस्य पणीकृतस्य
न्यासः ३२ ९ ७० लब्धं खारी २ द्रोणाः ७ आढकः १ प्रस्थौ २ अथ व्यस्तत्रैराशिके करण
सूत्रं वृत्तम् ८ इच्छावृद्धौ फले ह्रासो ह्रासे च वृद्धिश्च जायते व्यस्तत्रैराशिकं तत्र ज्ञेयं गणितको
विदैः १ जीवानां वयसो मौल्ये तौल्ये वर्णस्य हेमनि भागहारे च राशीनां व्यस्तत्रैराशिकं
स्मृतम् अत्रोद्देशकः प्राप्नोति चेत्षोडशवत्सरा स्त्री द्वात्रिंशतिं विंशतिवत्सरा किम् द्वि
धूर्वो हो निष्कचतुष्कमुक्षा प्राप्नोति धूःषड्वहस्तदा किम् १ न्यासः १६ ३२ २० लब्धानि
ष्काः २५ निष्कभागाश्च ३ द्वितीयस्य न्यासः २ ४ ६ लब्धो निष्कः १ निष्कभागाश्च २ सु
वर्णगणिते उदाहरणं ५ दशवर्णसुवर्णं चेद्गद्याणकमवाप्यते निष्केण तिथिवर्णं

तुतदावदकियन्मितं न्यासः १० १ १५ लब्धं २ अथभागहारेउदाहरणं सप्ताढकेनमा
नेनराशौसस्यस्यमापिते यदिमानशतं जातं २ तदापश्चाढकेनकिम् १ न्यासः ७ १०० ५
लब्धं १४० अथपञ्चराशिकादौसूत्रम् पञ्चसप्तनवराशिकादिकेन्योन्यपक्षनयनंफलछि
दां संविधायबहुराशिजेवधेस्वल्पराशिवधभाजितेफलम् १ अत्रोद्देशकः मासेशतस्य
यदिपञ्चकलान्तरंस्याद्वर्षेगतेभवतिकिंवदषोडशानाम् कालंतथाकथयमूलकलान्त
राभ्यांमूलंधनंगणककालफलेविदित्वा १ न्यासः १ १२ लब्धंकलान्तरं ४८ कालज्ञा
नार्थंन्यासः १ ० लब्धंकालः १२ मूलज्ञानार्थं १०० १६ न्यासः १ १२ ल ५ धंमूलं १६
उद्देशकः स १०० १६ त्र्यंशमासेनशतस्यचेत्स्यात्कल ५ ० ान्त १०० ० रंपञ्चसपञ्चमां
शाः मासैस्त्रिप ५ ४ ५ भिःपञ्चलवाधिकैस्तत्सार्द्धद्वियष्टेःफलमुच्य ५ ६ ५ तांकिम् १

न्यासः चक्रमितादैर्घ्ये सा णिज्य

४/३	१६/५
१००	१२५/२
२६/५	०

लब्धं कलान्तरम् ३२/५ अथ सप्तराशिके उद्देशकः विस्तारे त्रिकराः कराष्ट
तादैर्घ्ये विचित्राश्च चेद्रूपेरुत्कटपट्टसूत्रपट्टिका अष्टौ लभन्ते शतम् दै
र्ध्ये करत्रयाऽपरपटी हस्तार्द्धविस्तारिणी तादृक्किं लभते कुतं वद वणिग्वा
कं वेत्सि चेत् २ न्यासः

३/२	७/२
८	१/२
८	९
१००	०

लब्धं द्रम्माः १४ पणाः ९ काकिणी १ वराट
काः ६ वराटकभागाश्च २/३ नवराशिकेउदाहरणम् पिण्डयेऽर्कमिताङ्गुलाः कि
लचतुर्वर्गाङ्गुला विस्तृतौ पट्टा दीर्घे तया चतुर्दशकरास्त्रिंशल्लभन्ते शतम् एता
विस्तृतिदैर्घ्यपिण्डमितयो येषां चतुर्वि ञ्जिताः पट्टास्तेवद मे चतुर्दश सखे मूल्यं लभन्ते
कियत् १ न्यासः

१/२	१/३
२/३	१/२
२४	१०
३०	१४
१००	०

लब्धं निष्काः १६ निष्कभागाः २/३ एकादशराशिकेउदाहरणं प
ट्टाये प्रथमोदितप्रमितयोगयूतिमात्रे स्थिताः तेषामानयनाय चेत्कुकटि

नांद्रम्माऽष्टकं भाटकम् अन्येयेतदनन्तरं निगदितामानैश्चतुर्वर्जिता कोंऽशंका भवतीति
भाटकमिति निर्गच्छतिषेद्वद १ न्यासः लब्धं भाटकं द्रम्माः ८ अथ भाण्डप्रतिभा
ण्डके करणसूत्रं वृत्तार्द्धम् तथैव भाण्डप्रतिभाण्डकेऽपि विधिर्विपर्ययस्य हरां
श्चमौल्ये १ उद्देशकः द्रम्मेणाल्लभ्यत द्राम्रशतत्रयं चेत्रिंशत्पणेन विपणौ
वरदाडिमानि आम्रैर्दशभिः कति दाडिमानि लभ्यानि तद्विनिमये
न भवन्ति मित्र १ न्यासः लब्धानि दाडिमानि १६ इति प्रकीर्णाध्या
वहारः अथ मिश्रकव्यवहारे करणसूत्रं वृत्तार्द्धम् प्रमाणकाले
न हतं प्रमाणं विमिश्रकाले नहतं फलं च स्वयोगभक्ते च पृथक्स्थिते ते मिश्रा
हते मूलकलान्तरे स्तः १ यद्दृष्टकर्माख्यविधेस्तु मूलं मिश्राच्च्युतं तच्च कलान्तरं स्या 13

१/२	१/३
२/३	१/२
१४	१०
३०	१४
२	६
८	०

१६	१
३००	३०
१०	०

त अत्रोद्देशकः पञ्चकेनशतेनाऽब्दे मूलं स्वं सकलान्तरम् सहस्रं चेत्पृथक्तत्रवद मूलक
लान्तरे १ न्यासः सकलान्तरं धनं १००० लब्धं मूलधनं ६२५ कलान्तरञ्च ३७५ अ
थवेष्टकर्मणा तद्यथा दृष्टं १ उद्देशकालापवदिष्टराशिरित्यादिकरणेन रू
पस्य वर्षे कलान्तरम् ३ एतद्युक्तरूपेणानेन ८ रूपगुणं दृष्टं १००० भक्तं जातं
मूलधनम् ६२५ एतन्मि श्रा १००० च्युतं जातं क लान्तरं ३७५ करणसूत्रम् अ
थप्रमाणेगुणिताः स्वकालव्यतीतकालघ्नफलोद्धृतास्ते स्वयोगभक्ताश्च विमिश्रनि
घ्नाः प्रयुक्तखण्डानि पृथग्भवन्ति १ उद्देशकः यत्पञ्चकत्रिकचतुष्कशतेन दत्तं खण्डै
स्त्रिभिर्गणक निष्कशतं षडूनम् मासेषु सप्तदशपञ्चसु तुल्यमाप्तं खण्डत्रयेऽपि हि फ
लं वद खण्डसङ्ख्याम् १ न्यासः मिश्रधनं ९४ लब्धानि यथाक्रमं खण्डानि २४ २८ ४२

१	१२
१००	०
५	०

१	१	१
१००	१००	१००
५	३	४
७	१०	५
२४	२४	२४

मासफलं यद्यधिकं कनिष्ठराशेस्तु परराशिफलात् मासफलान्तरभक्तं राशिद्वयान्तरं
कालः १ अत्रोद्देशकः पञ्चकशतेन दत्तं रूपशतं द्विकशतेन दत्तं हि मूले फले गेह्युभयोः स
मता स्यात्केन कालेन १ न्यासः

१	१
१००	१००
५	२
१००	२००

फले ५ २ जातः समधनकालः १०० समधनं ६००
करणसूत्रं प्रक्षेपका मिश्रहता विभक्ताः प्रक्षेपयोगेन पृथक्फलानि १ उदाह
रणम् पञ्चाशदेकसहिता गणकाऽष्टषष्टिः पञ्चोनिता नवतिरादिधनं च ये
षाम् प्राप्ता विमिश्रितधनैस्त्रिशती त्रिभिस्तैर्वाणिज्यतो वद धनानि विभज्य तेषाम् १
न्यासः ५१ ६८ ८५ विमिश्रधनं ३०० जातानि धनानि ७५ १०० १२५ एतान्यादिध
नैरूनानि कलान्तराणि २४ ३२ ४० अथवा विमिश्रितधनमादिधनैक्योनं सर्वलाभयो
गः ९६ अस्मिन् प्रक्षेपगुणिते प्रक्षेपयोगभक्ते लाभः करणसूत्रम् भजेच्छिदोंशैरथ १४

ॐनमः

तेर्व्वि मिश्रे रूपं भजेत्स्यात्परिपूर्त्तिकालः १ उदाहरणं ये निर्झरा दिनदिनार्द्धतृतीयषष्ठैः सं
पूरयंति हि पृथक्पृथगेव मुक्ताः वापीं यदा युगपदेव सखे विमुक्तास्ते केन वासरलवेन त
दा वदाशु १ न्यासः [१/१ | १/२ | १/३ | १/६] लब्धं वापीपूर्त्तिकाले दिनांशः १/१२ करणसूत्रं वृत्तं पण्यैः
स्वमूल्यानि भजेत्स्वभागैर्हत्वा तदैक्येन भजेच्च तानि भागांश्च मिश्रेण धनेन
हत्वा मूल्यानि पण्यानि यथाक्रमं स्युः १ अत्रोद्देशकः सार्द्धं तन्दुलमानकत्रयमहो द्रम्मे
णमानाष्टकं मुद्गानां च यदि त्रयोदशमिता एता वणिक्काकिणीः आदायार्पय तन्दुलांश
युगलं मुद्गैकभागान्वितं क्षिप्रं क्षिप्रभुजो व्रजेम हि यतः सार्थोऽग्रतो यास्यति १ न्यासः
[१/१ ७/२ | १/१ ८/१] तन्दुलमुद्गभागौ २ १ अत्र स्वमूल्येन स्वभागगुणिते पण्याभ्यां भक्ते जातं [४/७ | १/८] अनयो
र्योगेन ३९/५६ एतेन [४/७ | १/८] स्वभागैर्गुणिते भक्ते जातं तन्दुलमुद्गमूल्ये [१/६ | ७/१९२] तथा तन्दुलमुद्ग

१५ वा१ मिश्रधनं १३/६४ ×

मानभागाश्च १४ ७ अत्र तन्दुलमौल्ये काकिण्यः १० वराटकाः १३ वराटकभागाश्च १ मुद्गमौल्ये
काकिण्यो २ २५ २६ वराटकाः ६ भागाश्च २ उद्देशकः कर्पूरस्य परस्य निष्कयुग ३ लेनैकं प
लं प्राप्यते वैश्यानन्दनचन्दनस्य च पलं द्र ३ म्माष्टभागेन चेत् अष्टांशेन तथागुरोः पलदलं
निष्केण मे देहि तान्भागैरेककषोडशाष्टकमितैर्धूपं चिकीर्षाम्यहम् १ न्यासः मू॰ मू॰ मू
प प प अत्र यथोक्तकरणेन लब्धानि क्रमेण मूल्यानि १४/२ ८/२ ८/२ एषां ३२/१ १/८ १/८
१/१ १/१ १/२ भा/१ भा/१६ भा/८ क्रमेण पलानि ४/२ ६४/२ ३२/२ अथ २/२ रत्नजातौ करणसूत्रं वृत्तं
नरघ्नदानोनितरत्नशेषैरिष्टे हृते स्युः खलु मूल्यसङ्ख्याः शेषैर्हृते शेषवधे पृथक्स्थे रभिन्नमू
ल्यान्यथवा भवन्ति १ उद्देशकः माणिक्याष्टकमिन्द्रनीलदशकं मुक्ताफलानां शतं सद्वज्रा
णि च पञ्च रत्नवणिजां येषां चतुर्णां धनम् सङ्गस्नेहवशेन ते निजधनाद्दत्त्वैकमेकं मिथो जा १५

तास्तुल्यधनाःपृथग्वदसखेतद्रत्नमूल्यानिमे १ न्यासः मा ८ | नी १० | मु १०० | ही ५ अत्रनरगुणितदाने
नरहतसङ्ख्योनितानुक्रमेणशेषाणि ४ | ६ | ९६ | १ एतैरिष्टेराशौहृतेरत्नमूल्यानिस्युः तानि
चयथाकथंचिदिष्टकल्पितभिन्नानिभवन्त्यतोयथाभिन्नानितथाकल्पितमिष्टं ९६ जाता
निमूल्यानि २४ | १६ | १ | ९६ जातंसमधनं ९६ अथवाशेषाणांवधेपृथक्शेषैर्भक्तेजातान्य
भिन्नानिमूल्यानि ५७६ | ३८४ | २४ | २३०४ एषामेतद्भक्ताःसम्भाव्यन्ते अथसुवर्णगणितसू
त्रम् सुवर्णवर्णाहतियोगराशौस्वर्णैक्यभक्तेकनकैक्यवर्णः वर्णोभवेच्छोधितहेमभक्ते
वर्णोद्धृतेशोधितहेमसङ्ख्या १ अत्रोद्देशकः विश्वार्करुद्रदशवर्णसुवर्णमाषादिग्वेदलो
चनयुगप्रमिताःक्रमेण आवर्तितेषुवदतेषुसुवर्णवर्णस्तूर्णंसुवर्णगणितज्ञवणिग्भ
वेत्कः १ तेशोधनेनयदिविंशतिरुक्तमाषाःस्युःषोडशाद्विगणवर्णमितिस्तदाकाचेद्वा

धितंभवतिषोडशवर्णंहेमते विंशतिं कतितदा तिष्ठन्तिमाषाः १ न्यासः

१३	१२	११	१०
१०	४	२	४

आवर्त्तितेजातंवर्णम् १२ माषाः २० एतेशोधिताः सन्तस्त्रेषोडशमासा
भवन्तितदावर्णः १५ करणसूत्रम् स्वर्णैक्यनिघ्नाद्युतिजातवर्णात्सुवर्णतद्वर्णवधैक्य
हीनात् अज्ञातवर्णोऽग्निजसङ्ख्ययाप्तमज्ञातवर्णस्यभवेत्प्रमाणम् १ अत्रोद्देशकः दश
शवर्णंवसुनेत्रमाषाअज्ञातवर्णस्यषडेतदैक्ये जातंसखेद्वादशकंसुवर्णमज्ञातवर्णस्य
वदप्रमाणम् १ न्यास

१०	११	०
८	२	६

युतिजवर्णः १२ लब्धमज्ञातवर्णस्यमानं १५ तौल्यज्ञा
नार्थसूत्रं स्वर्णैक्यनिघ्नो युतिजातवर्णः स्वर्णाघ्रवर्णैक्यवियोजितोसौ अज्ञमव
र्णाग्निजयोगवर्णविश्लेषभक्तोविहिताग्निजंस्यात् १ उदाहरणं दशेन्दुवर्णागुणचन्द्रमा
षाः किञ्चित्तथाषोडशकस्यतेषा जातेयुतौद्वादशकंसुवर्णं कतीहतेषोडशवर्णमाषाः १

न्यासः १० १४ १६ ज्ञावर्त्तितेज्ञातोवर्णः १२ लब्धं माषमानं १ सूत्रम् साध्येनोनोऽनल्पवर्णोवि
धेयःसा ३ १ ० ध्योवर्णः स्वल्पवर्णोनितश्च इष्टक्षुण्णे शोधके स्वर्णमाने स्यातां स्वल्पोऽनल्प
योर्वर्णयोस्ते १ उदाहरणं हाटकगुटिके षोडशदशवर्णे तद्युतौ सखे जातम् द्वादशवर्णं स्व
र्णं ब्रूहि तयोः स्वर्णमाने मे १ न्यासः १६ १० ० ० साध्यवर्णः १२ लब्धे सुवर्णवर्णमाने १६ १० २ ४
इति सुवर्णगणितम् करणसूत्रम् एकाद्येकोत्तराअङ्काव्यस्ताभाज्याःक्रम
स्थितैः परःपूर्वेणसङ्गुण्यस्तत्परस्तेनतेनच १ एकद्वित्र्यादिभेदाःस्युरिदं साधारणं स्मृतम्
छन्दश्चित्युत्तरे छन्दस्युपयोगोऽस्य तद्विदाम् २ मूषावहनभेदादौ खण्डमेरौ च शिल्पके वै
द्यके रसभेदीये तन्नोक्तं विस्तरभयात् ३ तत्र तावच्छन्दश्चित्युत्तरे उदाहरणम् प्रस्तारे मित्र
गायत्र्याः स्युः पादव्यक्तयः कति एकादिगुरवश्चाशु कति कथ्यतां पृथक् १ इहहिषडक्षरो

गायत्रीचरणः अतः षडन्तानामेकाद्येकोत्तराङ्कानां यस्तानां क्रमस्थितानां च न्यासः ६ ५ ४ ३ २ १
यथोक्तकरणेन लब्धा एकादिगुरुरूपक्रमः एगु ६ द्विगु १५ त्रिगु २० चगु १५ पंगु ६ १ २ ३ ४ ५ ६
षगु १ सर्वलघुः १ एषामैक्यं पादव्यक्तिमितिः ६४ एवं चतुर्थचरणाक्षरसङ्ख्याकानङ्कान् य
थोक्तं विन्यस्यैकादिगुरुभेदानानीय तेषामैक्यं कृत्वा जाता गायत्रीवृत्तव्यक्तिसङ्ख्या १६७७
७२१६ एवमुक्थाद्युत्कृतिपर्यन्तेषु छन्दसां व्यक्तिमितिः साध्या उदाहरणम् एकद्वित्र्यादि
मेलाप मुखावदनमिति ज्ञूदिमे भूमिभर्त्तुर्हर्म्ये रम्ये ऽथ ~~मुखचतुर~~ मुखे चतुरविरचिते श्लक्ष्णाशा
लाविशाले एकद्वित्र्यादियुक्त्या मधुरकटुककषायाम्लकक्षारतिक्तैरेकस्मिन् षड्रसैः स्युर्गणा
कतिविधव्यञ्जनव्यक्तिभेदाः न्यासः ८ ७ ६ ५ ४ ३ २ १ ऊर्ध्वमेवमष्टमुखे राजगृहे सका
दिमुखावाहनभेदाः ८ २८ ५६ ७० ५६ / १ २ ३ ४ ५ — १ २ ३ ४ ५ ६ ७ ८ — २८ ८ १ / ६ ७ ८ द्वितीयोदाहरणान्या ३७

स. ६ ५ ४ ३ २ १ व्यञ्जनसङ्ख्या ६ १५ २० १५ ६ १ योगः इतिभास्कराचार्यविरचिता
यां १ २ ३ ४ ५ ६ लीलावत्यांग १ २ ३ ४ ५ ६ णितपाट्यां मिश्रकव्यवहारः
अथश्रेढीव्यवहारेकरणसूत्रंवृत्तं सैकपदघ्नपदार्द्धमथैकाद्यङ्कयुतिःकिलसङ्कलिता
ख्या साद्वियुतेनपदेनविनिघ्नीस्यात्त्रिहृताकिलसङ्कलितैक्यम् १ उद्देशकः एकादीनां
नवान्तानांपृथक्सङ्कलितानिमे तेषांसङ्कलितैक्यानिप्रचक्ष्वगणकद्रुतम् १ न्यासः १
२ ३ ४ ५ ६ ७ ८ ९ लब्धान्येषांसङ्कलितानि १ ३ ६ १० १५ २१ २८ ३६ ४५ एषामैक्या
नि १ ४ १० २० ३५ ५६ ८४ १२० १६५ करणसूत्रम् द्विघ्नपदंकुयुतंत्रिविभक्तंसङ्कलि
तेनहतंकृतियोगः सङ्कलितस्यकृतेःसममेकाद्यङ्कघनैक्यमुदीरितमाद्यैः १ उदाह
रणं तेषामेवचवर्गैक्यंघनैक्यंचवदद्रुतम् इतिसङ्कलनामार्गेकुशलायदितेमतिः १

न्यासः १ २ ३ ४ ५ ६ ७ ८ ९ लब्धमेषां वर्गैक्यं २८५ घनैक्यं च २०२५ सूत्रम् व्येकपदघ्नचयोऽसुख
युक्स्यादन्त्यधनं मुखयुग्दलितं तत् मध्यधनं पदसङ्गुणितं तत्सर्वधनं गणितं च तदुक्तम् १ अ
त्रोद्देशकः आद्ये दिने द्रम्मा चतुष्टयं यो दत्वा द्विजेभ्योऽनुदिनं प्रवृत्तः दातुं सखे पञ्चचयेन पक्षे
द्रम्मा वद द्राक् कति तेन दत्ताः १ न्यासः आदिः ४ उत्तरः ५ गच्छः १५ अत्रादिधनं ४ मध्यधनं ३९
धनं७४ सर्व५८ अन्त्यंधनं ५८५ उदाहरणं आदिः सप्त चयः पञ्च गच्छोऽष्टौ यत्र तत्र मे मध्यान्त्यधनसङ्ख्यां के व
द सर्वधनं च किम् १ न्यासः आदिः ७ चयः ५ गच्छः ८ सर्वधनं १९६ अत्र समदिने गच्छे मध्यदि
नाभावात्सागपरदिनयोर्योगार्द्धं मध्यदिनं भवितुमर्हति इत्येवं मतिमतोह्यताम् सूत्रम् ग
च्छहृते गणिते वदनं स्याद्व्येकपदघ्नचयार्द्धविहीने उद्देशकः पञ्चाऽधिकशतं श्रेढीफलं सप्त
पदं किल चययत्र त्रयं विद्धो वदनं वद नन्दन १ आदिः० उत्तरः ३ गच्छः ७ गणितं १०५ लब्धमादिः ६ १८

४ ८ मध्यधनं ४५ अन्त्यधनं ८२

चयज्ञानार्थं सूत्रम् गच्छहृतं धनमादिविहीनं व्येकपदार्द्धहृतं प्रचयः स्यात् १ उद्देशकः प्रथ
ममगमदह्ना योजने योजनेशस्तदनु ननु कयाऽसौ ब्रूहि यातोऽध्ववृद्ध्या अरिकरिहरणा
र्थं योजनानामशीतिं रिपुनगरमवाप्तः सप्तरात्रेण धीमन् १ न्यासः आदिः २ उत्तरः ०
गच्छः ७ गणितं ८० लब्धमुत्तरः २२ गच्छज्ञानार्थं सूत्रम् श्रेढीफलादुत्तरलोचनघ्नाच्चया
र्द्धवक्त्रान्तरवर्गयुक्तात् मूलं मुखोनं चयखण्डयुक्तं चयोद्धृतं गच्छमुदाहरन्ति १ उद्देश
कः द्रम्मत्रयं यः प्रथमेऽह्नि दत्वा दातुं प्रवृत्तो द्विचयेन तेन शतत्रयं षष्ट्यधिकं द्विजेभ्यो दत्तं
कियद्भिर्दिवसैर्वदाशु १ न्यासः आदिः ३ उत्तरः २ गच्छः ० गणितं ३६० लब्धो गच्छः १८ क
रणसूत्रं सार्द्धार्या विषमे गच्छे व्येके गुणकः स्थाप्यः समेऽर्द्धिते वर्गः गच्छक्षयान्तमन्त्याद्व्य
स्तं गुणवर्गजं फलं यत्तत् १ व्येकं व्येकगुणोद्धृतमादिगुणं स्याद्गुणोत्तरे गणितम् १ उदाहर

णां पूर्वं वराटकयुगं येन द्विगुणोत्तरं प्रतिज्ञातं प्रत्यहमर्थिजनाय स मासे निष्कान्ददाति कति ॥
आदिः २ उत्तरो द्विगुणः गच्छः ३० लब्धं निष्काणां लक्षमेकं चत्वारिंशत्सहस्राण्यष्टौ शतानि सप्त
पञ्चाशत् १०४८५७ द्रम्माः ९ पणाः ९ काकिण्यौ २ वराटकाः ६ उदाहरणम् आदिर्द्वयं सखे
वर्धते प्रत्यहं त्रिगुणोत्तरा गच्छः सप्तदिनं यत्र गणितं तत्र किं वद १ न्यासः आदिः २ उत्तरस्त्रि
गुणः गच्छः ७ लब्धं गणितम् २१८६ करणसूत्रम् पादाक्षरमिते गच्छे गुणवर्गफलं चयं द्वि
गुणम् समवृत्तानां संख्या तद्वर्गो वर्गवर्गोऽर्ध १ स्वस्वपदोनो स्यातामर्धसमानां च विषमा
णाम् १ उदाहरणम् समानामर्धतुल्यानां विषमाणां पृथक्पृथक् वृत्तानां वद मे संख्यामनु
ष्टुप्छन्दसि द्रुतम् २ न्यासः उत्तरो द्विगुणः गच्छः ८ लब्धं समवृत्तानां संख्या २५६ अर्धसमा
नाम् ६५२८० विषमाणां च ४२९४९०७६० इति श्रेढीव्यवहारः पूर्तिमगात् ॥ १९


अथक्षेत्रव्यवहारः इष्टोवाहुर्यः स्यात्तत्स्पर्द्धिन्यांदिशीतरोवाहुः त्र्यस्रेवाचतुरस्रेसाकोटिःकी
र्त्तितातज्ज्ञैः १ तत्कृत्योर्योगपदंकर्णोदोःकर्णवर्गयोर्विवरात् मूलंकोटिःकोटिश्रुतिकृत्योर
न्तरात्पदंवाहुः २ राश्योरन्तरवर्गेणद्विघ्नेघातेयुतेतयोः वर्गयोगोभवेदेवंतयोर्योगान्तरा
हतिः ३ वर्गान्तरंभवेदेवंज्ञेयंसर्वत्रधीमता ४ उदाहरणम् कोटिश्चतुष्टयंयत्रदोस्त्रयंत
त्रकाश्रुतिः कोटिंदोःकर्णतःकोटिश्रुतिभ्यांचभुजंवद १ न्यासः भुजको
ट्योर्वर्गयोगः २५ यद्वाऽनयोर्घाते १२ द्विघ्ने २४ अन्तर १ वर्गयुतेजातोव र्गयोगः २५
४ ५
३
अस्यमूलंकर्णः ५ अथवान्यासः भुजः ३ कर्णः ५ अनयोर्वर्गान्तरं १६ वातयो
३ ५ योगान्तराहति १६ वर्गान्तरम् अस्यमूलंजाताकोटिः ४ अथवान्यासः ४ ५ अ
नयोर्वर्गान्तरं ९ योगान्तराहतिः ९ अस्यमूलंज्ञातोभुजः ३ उदाहरणम् सांघ्रित्रयमितो

वाहुर्यत्र कोटिश्च तादृशी तत्र कर्णप्रमाणं किं गणक ब्रूहि मे द्रुतम् १ न्यासः
जकोट्योर्वर्गयोगः ३३८ अस्य मूलाभावात्करणीगत एव कर्णः द्वाभ्याम
पवर्त्तितः १६९ अ १६ स्यासन्नमूलज्ञानार्थमुपायः वर्गेण महतेष्टेन व
छेदांशयो ८ र्हतात् पदं गुणपदक्षुण्णच्छिद्धृतं निकटं भवेत् १ इयं कर
द्वाभ्यामपवर्त्तिता १६९ अस्याश्छेदांशघातः १३५२ इष्टं १०० अस्य वर्गः १०००० अनयोर्घा
तः १३५२०००० अ ८ स्यासन्नमूलं ३६७७ गुणमूलेन १०० छेद ८ गुणेन ८०० भक्तं लब्ध
मासन्नपदम् ४ एवं सर्वत्र भुजे ज्ञाते कोटिकर्णज्ञानार्थं सूत्रम् इष्टो भुजोऽस्माद्द्विगुणेष्ट
निघ्नादिष्टस्य ४७७ कृत्यैकवियुक्तयाप्तम् कोटिः पृथक्सेष्टगुणा भुजोना कर्णो भवेत्त्र्यस्रमिदं
तु जात्यम् १३ ८०० ष्टो भुजस्तत्कृतिरिष्टभक्ता द्विस्थापितेष्टोनयुतार्धिताच तो कोटिकर्णौ



सु
प
था
णी

वित्तिकोटिंतौवाबाहुश्रुतीचाकरणीगतेस्तः १ उदाहरणम् भुजेद्वादशकेविद्वन्कोटिकर्णा
वनेकधा प्रकाराभ्यांवदक्षिप्रंतौतावकरणीगतौ १ न्यासः भुजः १२ इष्टं २ द्विगुणेनाऽ
नेन ४ भुजोगुणितः ४८ इष्टकृत्या ४ कोनया ३ भक्तो लब्धाकोटिः १६ इयमिष्टगुणा ३२
भुजोनाजातः कर्णः २० क्षेत्रदर्शनम्




एवंत्रिकेणेष्टेन कोटिः ९ कर्णः १५
भुजः १२ पञ्चकेनेष्टेनवाकोटिः ५ भुजः १२ कर्णः १३ यद्वेष्टो भुजः १२
कृतिः १४४ इष्ट २ भक्ता लब्धिः ७२ इयं पृथगिष्टेनयुताऽर्द्धिता जातो
कोटिकर्णौ कोटिः ३५ कर्णः ३७ चतुष्केनवाकोटिः १६ कर्णः २० षट्केन
कोटिः ९ कर्णः १५ कर्णेज्ञातेभुजकोटिज्ञानार्थं सूत्रं इष्टेन निघ्नाद्द्विगुणाच्चकर्णाद्दि
ष्टस्यकृत्येकयुजायदाप्तम् कोटिर्भवेत्सापृथगिष्टनिघ्नीतत्कर्णयोरंतरमत्रबाहुः १

उदाहरणं पञ्चाशीतिमिते कर्णे यो यावकरणीगतौ स्यातां कोटिभुजौ तौ तौ वद कोवि
दसत्वरम् १ न्यासः कर्णः ८५ अयं द्विगुणः १७० द्विकेनेष्टेनाहतो जातः ३४० इष्टकृ
त्या ४ सैकया ५ भक्तो जाता कोटिः ६८ इयमिष्टगुणा १३६ कर्णोनिता जातो भुजः ५१
क्षेत्रदर्शनम् चतुष्केनेष्टेन वा कोटिः ४० भुजः ७५ वा करणसूत्रम् इष्टवर्गे
णा सैकेन द्विघ्नः कर्णोथवा हृतः फलोनः श्रवणः कोटिः फलमिष्टगुणं भु
जः १ सा वक्ति कर्णः ८५ द्विघ्नः १७० इष्टवर्गेण ४ सैकेन ५ हृतः ३४ श्रवणः
८५ फलोनो ५१ जाता कोटिः फलं ३४ इष्ट २ गुणं ६८ जातो भुजः अत्र दोःकोट्यो
र्नाम भेदः केवलं न स्वरूपभेदः कोटिकर्णभुजाज्ञानेकरणसूत्रम् इष्टयोराहतिर्द्विघ्नी
कोटिर्वर्गान्तरं भुजः कृतियोगस्तयोरेव कर्णश्चाकरणीगतः १ उद्देशकः येयैस्त्र्यसैम २२


६८ ८५ ५१

वेज्ञात्यं कोटिदोः श्रवणाः सखे त्रीण्यप्यविदितांस्तान्मे क्षिप्रं वद विचक्षण १ अत्रेष्टे १२ आ
भ्यां कोटिभुजकर्णाः ४ ३ ५ अथवेष्टे २ ३ आभ्यां १२ ५ १३ अथवेष्टे २ ४ आभ्यां १६ १२ २०
एवमनेकधा कर्णकोटियुतौ भुजे ज्ञाते पृथक्करणार्थं सूत्रम् वंशाग्रमूलान्तरभूमिवर्गो वं
शोद्धृतस्तेन पृथग्युतोनः वंशस्तदर्द्धे भवतः क्रमेण वंशस्य खण्डे श्रुतिकोटिरूपे १ उदाह
रणम् यद्विसमभुवि वेणुर्द्वित्रिपाणिप्रमाणो गणक पवनवेगादेकदेशे स भग्नः भुवि नृप
मितहस्तेष्वङ्ग लग्नं तदग्रं कथय कतिषु मूलादेष भग्नः करेषु १ न्यासः कोटिकर्णयुतिः ३२
भुजः १६ जाते ऊर्ध्वाऽधरखण्डे २० १२ क्षेत्रदर्शनम् बाहुकर्णयोगे कोटि
ज्ञाने च पृथक्करणार्थं सूत्रम् स्तम्भस्य वर्गोऽहिबिलान्त रेण भक्तः फलं व्याल
बिलान्तरालात् शोध्यं तदर्द्धप्रमितैः करैः स्याद्बिलाग्र तो व्यालकलापियोगः १



ॐनमः

उदाहरणं अस्ति स्तम्भतले विलं तदुपरि क्रीडाशिखण्डी स्थितस्तम्भे हस्तनवोच्छ्रिते त्रिगुणि
तस्तम्भप्रमाणान्तरे दृष्ट्वाऽहिं विलमाव्रजन्तमपतत्तिर्यक्स तस्यो परि क्षिप्रं ब्रूहि तयोर्विलात्
कति मितैः साम्येन गत्योर्युतिः १ न्यासः स्तम्भः ९ अस्य वर्गः ८१ विलाहिरेखा २७ भक्तो लब्धं ३
इदं व्यालविलान्तरालाच्छोध्यं शेषं २४ अस्यार्द्धप्रमाणैः करैर्विलाद्व्यालकलापियोगो जातः १२
स एव भुजः भुजोना भूः कर्णः १५ क्षेत्रदर्शनम्




अथ कोटिकर्णान्तरे भुजे च ज्ञा
ते कोटिकर्णज्ञानार्थं सूत्रम् भुजाद्वर्गितात्कोटि कर्णान्तराप्तं द्विधा कोटिकर्णा
न्तरेणोनयुक्तम् तदर्द्धे क्रमात्कोटिकर्णौ भवे तामिदं धीमतावेत्य सर्वत्र यो
ज्यम् १ सखे पद्मतन्मज्जनस्थानमध्यं भुजः को टिकर्णान्तरं पद्मदृश्यम् नलः
कोटिरेतन्मितं स्यात् दिलो भो वदैवं समानीयपानीयमानम् २ उदाहरणम् चक्रक्रौञ्चाकुलितश २२

लिलेक्वापि दृष्टं तडागे तोयादूर्ध्वं कमलकलिकाग्रं वितस्ति प्रमाणम् मन्दं मन्दं चलितमनिलेनाहतं हस्त
युग्मे तस्मिन्मग्नं गणक गणय क्षिप्रमम्बुप्रमाणम् १ न्यासः




लब्धं जलगाम्भीर्यम् १५ ।
यं कोटिः द्युयमेव कलिकामानयुता कर्णः ५ अथ कोट्यग्राम्बु जे कियत्यपि दृष्टे शेष ४ भु
जज्ञानार्थं साम्ये सति करणसूत्रम् द्विनिघ्न ४ तालोच्छ्रितिसं युतं यत्सरोन्तरं तेन विभा
जितायाः तालोच्छ्रितेस्तालसरोन्तरघ्नात् उड्डीयमानं खलु लभ्येत तत् १ उद्देशकः
वृक्षाद्धस्तशतोच्छ्रयाच्छतयुगे वापीं कपिः कोप्यगादुत्तीर्योऽथपरो द्रुतं श्रुतिपथात्प्रोड्डीय किंचिद्द्रु
मात् जातैवं समता तयोर्यदि गतावुड्डीयमानं कियद्विद्वंश्चेत्सुपरिश्रमोऽस्ति गणिते क्षिप्रं तदाच
क्ष्व मे १ न्यासः



तालोच्छ्रितिः १०० द्विगुणिता २०० सरोन्तरयुता ४०० अनयाताल
सरोन्तरघ्नी ता लोच्छ्रिति २०००० भक्ता लब्धमुड्डीयमानं ५० भुजकोटियोगे कर्णे

ज्ञातेसूत्रम् कर्णस्यवर्गाद्द्विगुणाद्विशोध्योदोःकोटि योगःस्वगुणोस्यमूलम् योगोद्विधामूलविही
नयुक्तःस्यात्तांतदर्द्धेभुजकोटिमाने १उदाहरणम् दशसप्ताधिकःकर्णस्त्र्यधिकाविंशतिःस
खे भुजकोटियुतिर्यत्र तत्र ते मे पृथग्वद १ न्यासः कर्णः १७ भुजकोटियुतिः २३ ज्ञातेभुजको
टी ८ १५ दर्शनमदः



लम्बभूखण्डज्ञानार्थसूत्रम् अन्योन्यमूलाग्रगसूत्रयोगा
द्वेणवोर्वधेयोगहृतेऽव लम्बः वंशौस्वयोगेनहृतावभीष्टभूघ्नौ चलम्बोभयतःकुख
ण्डे १ उदाहरणं पञ्चद शदशकरोच्छ्रायवेणवोरज्ञातमध्यभूमिकयोः इतरेतरमू
लाग्रगसूत्रयुतेर्लम्बमा चक्ष्व १ न्यासः वेणू १५ १० ज्ञातोलम्बः ६ वंशांतरभूः ५ अज्ञा
तेभूखण्डे ३ २ अथवाभूः १० खण्डे ६ ४ वाभूः १५ खण्डे ९ ६ वाभूः २० खण्डे १२ ८ सर्वत्रलम्बः समाव
यदिभूमितुल्येभुजेवंशःकोटिस्तदाभूखण्डेन किमितित्रैराशिकेनैवसर्वत्रप्रत्ययः २३




अथक्षेत्रलक्षणे सूत्रम् धृष्टोद्दिष्टमृजुभुजंयत्रैकबाहुतःस्वल्पा तदितरभुजयुतिरथवातुल्याज्ञेया
तदक्षेत्रम् १ उदाहरणम् चतुरस्रेद्विषड्द्वार्काभुजास्त्र्यस्रे त्रिषण्नव उद्दिष्टा यत्रधृष्टेनतदक्षेत्रंवि
निर्दिशेत् १ न्यासः एतेऽनुपपन्नक्षेत्रे भुजप्रमाणशलाकाभुज
